National Journal of
Hindi & Sanskrit Research

ISSN: 2454-9177
NJHSR 2026; 1(64): 368-371
© 2026 NJHSR
www.sanskritarticle.com

श्री गगनदीपः
सहायकाध्यापकः (दर्शनविभागः),
कविकुलगुरुसंस्कृतविश्वविद्यालयः,
रामटेकम्, नागपुरम्।

Correspondence:
श्री गगनदीपः
सहायकाध्यापकः (दर्शनविभागः),
कविकुलगुरुसंस्कृतविश्वविद्यालयः,
रामटेकम्, नागपुरम्।

# आनन्दमयाधिकरणे शाङ्करस्वामिनारायणभाष्ययोः दार्शनिकतुलनात्मकमीमांसा

**श्री गगनदीपः**

**शोधसारः**

अस्मिन् शोधपत्रे ब्रह्मसूत्रस्य आनन्दमयाधिकरणे प्रतिपादितस्य आनन्दमयपदस्य तात्पर्यं शाङ्करभाष्यस्वामिनारायणभाष्ययोः आधारेण तुलनात्मकदृष्ट्या परिशीलितम्। अध्ययनक्रमे सूत्रेषु निहितानां अभ्यास-, तद्धेतुव्यपदेश-, भेदव्यपदेशादीनां प्रमाणानां विवेचनपूर्वकं आनन्दमयशब्दस्य ब्रह्मपरत्वं परीक्षणविषयीकृतम्। उभयभाष्यकारैः स्वीकृतस्य आनन्दमयस्य स्वरूपे, तस्य ब्रह्मसम्बन्धे, मोक्षोपयोगित्वे च विद्यमानाः साम्यवैषम्यरूपाः तात्त्विकविशेषाः समीक्षिताः। अध्ययनात् ज्ञायते यदुभयभाष्यकारैरपि आनन्दमयपदस्य परमतत्त्वपरत्वं स्वीकृतमस्ति, तथापि तस्य तात्त्विकस्वरूपनिर्णये मौलिकं वैचारिकवैभिन्न्यमुपलभ्यते। अतः आनन्दमयाधिकरणम् अद्वैतवेदान्तस्य अक्षरपुरुषोत्तमदर्शनस्य च दार्शनिकवैशिष्ट्यप्रकाशने आधारत्वेन प्रतिष्ठते।

**कूटशब्दाः**

परब्रह्मवाचकत्वनिर्णयः, तात्पर्यावधारकलिङ्गसमन्वयः, मयट्प्रत्ययप्राचुर्यार्थता, श्रुत्येकवाक्यतासिद्धिः, मयट्प्रत्ययनिरुक्तिः, भेदश्रुतिप्रामाण्यम्, अक्षरपरब्रह्मविवेकः इत्यादयः।

**प्रस्तावना**

भारतीयदार्शनिकपरम्परायां वेदान्तदर्शनं श्रुतिप्रतिपादितब्रह्मतत्त्वस्य युक्तिसम्मतव्यवस्थापनपरं शास्त्रमिति प्रसिद्धम्। उपनिषदां ब्रह्मविद्यावाक्यानां परस्परसामञ्जस्येन तात्पर्यनिर्णयाय बादरायणप्रणीतानि ब्रह्मसूत्राणि न्यायप्रस्थानत्वेन स्वीकृतानि सन्ति। तेषु प्रथमाध्यायस्य प्रथमपादे ब्रह्मणः जगत्कारणत्वं, सर्ववेदान्तप्रतिपाद्यत्वं, सर्वोत्कृष्टत्वं च विविधाधिकरणैः निरूप्यते। तत्र आनन्दमयाधिकरणं विशिष्टमहत्त्वं धारयति, यतः तैत्तिरीयोपनिषदि प्रसिद्धस्य 'आनन्दमय' इति पदस्य तात्पर्यनिर्णयः अत्र क्रियते।

तैत्तिरीयोपनिषदः ब्रह्मानन्दवल्ल्यां अन्नमय-प्राणमय-मनोमय-विज्ञानमयानां क्रमिकनिरूपणानन्तरम् आनन्दमयस्योपदेशः प्राप्यते। अत्र आनन्दमयशब्दः किम् उपाधिविशिष्टजीवपरः, उत कोशविशेषपरः, आहोस्वित् सर्वोपाधिविलक्षणपरब्रह्मपरः इति प्रश्नः स्वाभाविकतया समुत्पद्यते। एतस्यैव प्रश्नस्य समाधानाय ब्रह्मसूत्रकारैः "आनन्दमयोऽभ्यासात्[1]" इत्यारभ्य "अस्मिन्नस्य च तद्योगं शास्ति[2]" इत्यन्तानि सूत्राणि प्रणीतानि। अतः इदमधिकरणं केवलं शब्दार्थनिर्णयपरं न, अपितु ब्रह्मस्वरूपविवेचनपरमपि भवति।

अस्याधिकरणस्य व्याख्याने वेदान्तपरम्परायां नानाचार्यैः स्वस्वसिद्धान्तानुगुणं विविधानि मतानि प्रतिपादितानि। तेषु अद्वैतवेदान्तप्रवर्तकैः श्रीशङ्करभगवत्पादैः आनन्दमयशब्दस्य परब्रह्मपरत्वं समर्थ्य मयट्प्रत्ययस्य प्राचुर्यार्थकत्वम् अङ्गीकृतम्। तदनुसारं आनन्दमयः सर्वदोषविलक्षणं, निरुपाधिकं, निर्विशेषं ब्रह्मेति प्रतिपाद्यते। अपरतः अक्षरपुरुषोत्तमदर्शनपरम्परायां स्वामिनारायणभाष्यकारैः आनन्दमयपदस्य पुरुषोत्तमपरब्रह्मवाचकत्वं प्रतिपाद्य, अक्षरब्रह्मणः परब्रह्मणश्च भेदः श्रुतिस्मृति-सूत्रप्रमाणैः संस्थाप्यते।

एवमेव समानश्रुत्यवलम्बनेऽपि भिन्नदर्शनपरम्पराभ्यां भिन्नः तात्त्विकनिष्कर्षः प्रतिपाद्यते।

अतः प्रस्तुतशोधपत्रे आनन्दमयाधिकरणस्य शाङ्करभाष्यस्वामि-नारायणभाष्ययोः प्रतिपादितमतानां तुलनात्मकपरिशीलनं विधीयते। तेन आनन्दमयशब्दस्य तात्पर्यं, तदाधारितब्रह्मस्वरूपं, जीवब्रह्म-सम्बन्धश्च समीक्षात्मकदृष्ट्या प्रकाशयितुं प्रयत्नः क्रियते।

**आनन्दमयाधिकरणस्य परिचयः**

ब्रह्मसूत्रस्य प्रथमाध्याये शास्त्रयोनित्वाधिकरणात् प्रभृति ब्रह्मणः सर्ववेदान्तप्रतिपाद्यत्वं, जगत्कारणत्वं, सर्वज्ञत्वं च विविधश्रुति-समन्वयपूर्वकं प्रतिष्ठापितम्। एतस्मिन्नेव प्रसङ्गे तैत्तिरीयोपनिषदि ब्रह्मानन्दवल्ल्यां प्रतिपादितस्य आनन्दमयपदस्य तात्पर्यनिर्णयाय आनन्दमयाधिकरणमवतार्यते। विषयभूता श्रुतिः - "तस्माद्वा एतस्माद्विज्ञानमयादन्योऽन्तर आत्माऽऽनन्दमयः[3]" इति।

अस्यां श्रुतौ विज्ञानमयात् भिन्नस्य आनन्दमयस्योपदेशः श्रूयते। परन्तु अन्नमय-प्राणमय-मनोमय-विज्ञानमयानां पूर्वोपन्यासदृष्ट्या आनन्द-मयोऽपि तेषामेव कोऽपि कोशविशेषः स्यात्, उत सर्वोपाधिविलक्षणं परं ब्रह्मेति सन्देहः समुत्पद्यते। विशेषतः मयट्प्रत्ययस्य विकारार्थप्रसिद्धिः तथा प्रियशिरस्त्वाद्यवयवनिर्देशः पूर्वपक्षस्य बीजत्वेन दृश्यते।

एतादृशस्य संशयस्य निरसनाय सूत्रकारैः "आनन्दमयोऽभ्यासात्" इत्यारभ्य "अस्मिन्नस्य च तद्योगं शास्ति" इत्यन्तैः सूत्रैः आनन्दमयशब्दस्य तात्पर्यं परीक्षितम्। तत्र अभ्यासः, प्राचुर्यम्, तद्धेतुव्यपदेशः, मन्त्रवर्णसमर्थनम्, भेदव्यपदेशः, प्राप्तव्यत्वोपदेशश्च आनन्दमयस्य ब्रह्मपरत्वसाधने प्रमुखतया उपन्यस्ताः। एवमेव इदमधिकरणं तैत्तिरीयश्रुत्यां प्रतिपादितस्य आनन्दमयपदस्य ब्रह्मवाचकत्वनिर्णयपरमधिकरणत्वेन वेदान्तपरम्परायां विशेषमादर-मधिगच्छति।

**शाङ्करमतम्**

आनन्दमयाधिकरणे श्रीशङ्करभगवत्पादैः तैत्तिरीयोपनिषदि प्रतिपादितस्य आनन्दमयपदस्य तात्पर्यनिर्णयः क्रियते। विज्ञानमयको-शस्योपरि निर्दिष्टः आनन्दमयः किम् जीवविशेषः, उत परब्रह्मैव—इति संशयस्य निवृत्त्यर्थमिदमधिकरणम् उपन्यस्तम्। भाष्यकारैः प्रतिपाद्यते यत् उपक्रमोपसंहाराभ्यां, अभ्यासेन, फलश्रुत्या, सर्ववेदान्तप्रत्ययेन च आनन्दमयशब्दस्य परब्रह्मणि एव मुख्यवृत्त्या प्रयोगः सिद्ध्यति।

"आनन्दमयोऽभ्यासात्" (१.१.१२) इति सूत्रे भाष्यकाराः दर्शयन्ति यत् तैत्तिरीयश्रुतौ आनन्दस्य पुनः पुनरभिधानं ब्रह्मविषयमेव। "सत्यं ज्ञानमनन्तं ब्रह्म", "रसो वै सः[4]", "आनन्दं ब्रह्मणो विद्वान्[5]" इत्यादिश्रुतिषु आनन्दस्वरूपस्य परमार्थब्रह्मणि उपसंहारात् आनन्दमयपदं न जीवपरम्, किन्तु ब्रह्मपरमेव। मयट्प्रत्ययस्य विकारार्थे ग्रहणे ब्रह्मणो निर्विकारत्वहानिः स्यात्; अतः अत्र प्राचुर्यार्थ एव ग्राह्यः। तेन आनन्दस्य परिपूर्णप्रकाशरूपत्वात् आनन्दमयः परब्रह्मैव इति सिद्ध्यति।

"विकारशब्दान्नेति चेन्न प्राचुर्यात्[6]" इति सूत्रे पूर्वपक्षी मयट्प्रत्ययस्य विकारार्थत्वमाश्रित्य आनन्दमयस्य ब्रह्मत्वं निराकर्तुमिच्छति। तदसङ्गतमिति भाष्यकारैः निरूपितम्। यतो हि लोके वेदे च मयट्प्रत्ययस्य प्राचुर्यार्थकप्रयोगोऽपि दृश्यते। अतः आनन्दबहुलत्वात्, आनन्दघनत्वाच्च ब्रह्मणः "आनन्दमय" इति व्यपदेशः युक्तः। न च तेन ब्रह्मणः कश्चिद्विकारः कल्प्यते।

"तद्धेतुव्यपदेशाच्च[7]" इति सूत्रे आनन्दमयस्य ब्रह्मत्वे निर्णायकयुक्तिः प्रदर्श्यते। श्रुतौ आनन्दस्य कारणत्वेन यः निर्दिश्यते, स जीवो न भवितुमर्हति; जीवस्य परतन्त्रत्वात्। अपि तु यस्मात् सर्वेषामानन्दानां निष्पत्तिः, यः सर्वानन्दस्वरूपाणां मूलकारणम्, तदेव परब्रह्म। "रसो वै सः", "एष ह्येव आनन्दयाति[8]" इत्यादिश्रुतयः आनन्दमयस्य सर्वानन्द-हेतुत्वं प्रतिपादयन्ति। कारणस्य कार्यातिशायित्वन्यायेन च आनन्दमयः परब्रह्मैव, न जीवविशेषः।

"मान्त्रवर्णिकमेव च गीयते[9]" इति सूत्रे मन्त्रब्राह्मणयोरेकवाक्यता प्रतिष्ठाप्यते। तैत्तिरीयोपनिषदि ब्रह्मानन्दवल्ल्याः प्रारम्भे "सत्यं ज्ञानमनन्तं ब्रह्म[10]" इति मन्त्रे यत् ब्रह्म निरूपितम्, तदेव उत्तरभागे आनन्दमयशब्देन प्रतिपाद्यते इति तेषां अभिप्रायः। अतः मन्त्रभागे वर्णितस्य ब्रह्मणः ब्राह्मणभागे आनन्दमयरूपेणोपसंहारः क्रियते। विषयभेदकल्पने प्रकरणभेदापत्तेः, श्रुत्येकवाक्यताया विघाताच्च, आनन्दमयस्य ब्रह्मपरत्वमेव युक्तमिति भाष्यकाराः प्रतिपादयन्ति।

"नेतरोऽनुपपत्तेः[11]" इति सूत्रे आनन्दमयस्य जीवत्वं निराक्रियते। श्रुतौ प्रतिपादितं सर्वज्ञत्वम्, सर्वशक्तिमत्त्वम्, सर्वानन्दहेतुत्वं च जीवे नोपपद्यते। अविद्योपहितस्य जीवस्य परिमितज्ञानत्वात्, दुःखानुभवि-त्वाच्च, श्रुत्युक्तधर्माणां तत्र असम्भवः। अतः आनन्दमयशब्दवाच्यः जीवो न, किन्तु सर्वोपाधिविलक्षणं ब्रह्मैव इति सिद्ध्यति।

"भेदव्यपदेशाच्च[12]" इति सूत्रे भाष्यकारैः भेदश्रुतीनामवलम्बनं कृतम्। "रसं ह्येवायं लब्ध्वाऽऽनन्दी भवति" इत्यादिश्रुतिषु प्राप्तृ-प्राप्यभावस्य उपदेशः दृश्यते। आनन्दमयस्य प्राप्तव्यत्वेन, जीवस्य च प्राप्तृत्वेन निर्देशात् उभयोरपि व्यवहारदशायां भेदव्यपदेशः सिद्धः भवति। अयं च भेदः परमार्थतो न, किन्तु अविद्याकल्पितव्यवहारापेक्षया इति भाष्यकाराणां स्पष्टोऽभिप्रायः। अद्वैतसिद्धान्ते मोक्षे भेदस्य बाधितत्वात्, अयं श्रुत्युपदिष्टो भेदः व्यावहारिकदृष्ट्या एव ग्राह्यः।

"कामाच्च नानुमानापेक्षा[13]" इति सूत्रे सांख्यप्रधानेन सह सम्भावितं साम्यं निरस्यते। श्रुतौ सृष्टेः पूर्वं "सः अकामयत" इति कामनाश्रवणात् कारणतत्त्वस्य चेतनत्वं सिद्ध्यति। अचेतनं प्रधानं कामनायोग्यम् न भवति। तस्मात् आनन्दमयस्य प्रधानपरत्वकल्पना निरस्ता। यः स्वेच्छया जगत्सृष्टिं संकल्पयति, स एव चेतनः परमेश्वरः आनन्दमयशब्देनाभिधीयते इति भाष्यकाराणां निष्कर्षः।

"अस्मिन्नस्य च तद्योगं शास्ति[14]" इति चरमसूत्रे आनन्दमयस्य प्राप्तव्यत्वमाश्रित्य तस्य परब्रह्मत्वं पुनरपि दृढीकृतम्। श्रुतौ जीवस्य

ब्रह्मप्राप्तिरूपः योगः प्रतिपाद्यते। प्राप्तव्यस्य प्राप्तुः च भेदव्यवहारो यावत् अविद्यावस्था तावत् अवश्यं स्वीकार्यः। अतः आनन्दमयः प्राप्तव्यतत्त्वत्वेन निर्दिश्यमानः जीवभिन्नः परब्रह्मैव। एतेन आनन्दमयाधिकरणस्य समग्रतात्पर्यं परब्रह्मविषयमेव इति निर्णीयते।

एवं श्रीशङ्करभगवत्पादैः अभ्यासः, प्राचुर्यम्, कारणत्वम्, मन्त्र-ब्राह्मणैकवाक्यता, जीवधर्मानुपपत्तिः, भेदव्यपदेशः, चेतनकारणत्वम्, प्राप्तव्यत्वम् इत्येतैः प्रमाणैः आनन्दमयपदस्य ब्रह्मपरत्वं सुसम्पादितम्। तेषां मते आनन्दमयः न कोशविशेषः, न जीवः, न प्रधानं, अपितु सर्वानन्दस्वरूपं निर्गुणं परब्रह्मैव।

**स्वामिनारायणभाष्ये आनन्दमयाधिकरणविचारः**

आनन्दमयाधिकरणव्याख्याने स्वामिनारायणभाष्यकाराणां दृष्टिः अक्षरपुरुषोत्तमवेदान्तस्य मूलतत्त्वैः समन्विता दृश्यते। अतः आनन्दमयशब्दस्य व्याख्यानं केवलं पदार्थनिर्णयपर्यन्तं न सीमितं भवति, अपितु परब्रह्मपुरुषोत्तमस्य सर्वोत्कृष्टस्वरूपप्रतिपादनस्य साधनत्वेन व्यवह्रियते। भाष्यकाराणां मते तैत्तिरीयश्रुतौ प्रतिपादितोऽयं आनन्दमयः सर्वकल्याणगुणनिधिः, सर्वानन्दनिधानम्, सर्वकारणकारणं च परब्रह्म पुरुषोत्तम एव।

“आनन्दमयोऽभ्यासात्” इति सूत्रस्य व्याख्याने आनन्दशब्दस्य पुनरुपदेशः परब्रह्मणि एव पर्यवस्यतीति प्रतिपाद्यते। श्रुतौ प्रतिपादितः आनन्दः न केवलं सुखविशेषः, नापि जीवस्यावस्थाविशेषः, किन्तु परमेश्वरस्य स्वाभाविकः, अनन्तः, निरतिशयश्च महिमागुणः। अतः आनन्दमयपदं परमपुरुषोत्तमस्यैव बोधकमिति भाष्यकाराणां निष्कर्षः।

“विकारशब्दान्नेति चेन्न प्राचुर्यात्” इति सूत्रे मयट्प्रत्ययस्य प्राचुर्यार्थकत्वमङ्गीकृत्य आनन्दपूर्णत्वस्य निर्देशः क्रियते। आनन्दस्य अनवधिकप्राचुर्यं यस्मिन् वर्तते, यश्च स्वभक्तानामपि आनन्दस्य परमाश्रयः, स एव आनन्दमय इत्युच्यते। अत्र ब्रह्मणः निर्विकारत्वं रक्षितमेव, तथापि गुणवैभवस्य परिपूर्णतायाः प्रतिपादनमपि सम्पन्नं भवति।

“तद्धेतुव्यपदेशाच्च” इति सूत्रे भाष्यकाराः विशेषतया दर्शयन्ति यत् समस्तानन्दानां मूलकारणत्वं परब्रह्मण एव युक्तम्। जीवस्य आनन्दः परतन्त्रः, अक्षरब्रह्मणोऽपि आनन्दः परब्रह्माश्रितः, किन्तु पुरुषोत्तमस्य आनन्दः स्वाभाविकः, स्वतन्त्रः, अनन्तश्च। अतः आनन्दस्य परमाधारत्वं पुरुषोत्तमे एव सिद्ध्यति।

“मान्त्रवर्णिकमेव च गीयते” इति सूत्रे मन्त्रब्राह्मणयोरेकविषयत्वं स्वीकृत्य “सत्यं ज्ञानमनन्तं ब्रह्म” इत्यादिमन्त्रेषु प्रतिपादितं तत्त्वमेव आनन्दमयशब्देन विवक्षितमिति प्रतिपाद्यते। तथापि भाष्यकाराणां मते तद्ब्रह्म अक्षरब्रह्म न, किन्तु अक्षरातीतः पुरुषोत्तम एव, यः सर्वगुणपरिपूर्णत्वेन श्रुतिषु स्तूयते।

“नेतरोऽनुपपत्तेः” तथा “भेदव्यपदेशाच्च” इत्यनयोः सूत्रयोर्व्याख्याने जीवपरमात्मनोर्भेदः यथार्थरूपेण स्वीक्रियते। आनन्दमयस्य प्राप्तव्यत्वोपदेशः, जीवस्य प्राप्तृत्वोपदेशश्च, उभयोरपि तात्त्विकभेदस्य द्योतकः इति भाष्यकाराणां मतम्। अयं भेदः न केवलं व्यवहारदशायाम्, अपितु तत्त्वतः अपि स्वीकृतः। अतः जीवः, अक्षरब्रह्म, परब्रह्म चेति तत्त्वत्रयस्य भेदः अस्मिन् प्रसङ्गे सुस्पष्टं प्रतिपाद्यते।

“कामाच्च” इत्यादिसूत्रे जगत्सृष्टेः पूर्वं श्रुतिषु प्रतिपादितः सङ्कल्पः चेतनपरमेश्वरस्यैव धर्म इति दर्श्यते। अचेतनप्रधानस्य तत्र अवसरः नास्ति। सृष्टि-स्थिति-प्रलयरूपविश्वव्यवहारस्य नियन्तृत्वं पुरुषोत्तम-स्यैव इति भाष्यकाराः प्रतिपादयन्ति।

“अस्मिन्नस्य च तद्योगं शास्ति” इति चरमसूत्रे मोक्षस्वरूपस्य निरूपणं दृश्यते। भाष्यकाराणां मते जीवः अक्षररूपतां प्राप्य पुरुषोत्तमस्य नित्यदासभावेन तिष्ठति। अतः आनन्दमयस्य प्राप्तिः तादात्म्यरूपा न, किन्तु भगवदनुभवरूपा, भक्तिरूपा, सेवारूपा च। एष एव अक्षरपुरुषोत्तमदर्शनस्य वैशिष्ट्यपूर्णः मोक्षसिद्धान्तः।

एवं स्वामिनारायणभाष्यकाराः आनन्दमयाधिकरणस्य व्याख्याने परब्रह्मपुरुषोत्तमस्य सर्वोत्कृष्टत्वं, अक्षरब्रह्मणः पृथक्सत्ता, जीवस्य परतन्त्रत्वं, मोक्षस्य भगवत्सेवारूपत्वं च प्रतिपादयन्तः अस्याधि-करणस्य विशिष्टं दार्शनिकपरिप्रेक्ष्यं निर्मिमते।

**तुलनात्मकविमर्शः**

आनन्दमयाधिकरणस्य व्याख्याने शाङ्करभाष्यकारयोः स्वामिनारा-यणभाष्यकाराणां च अभिप्राययोः कतिपयेषु स्थलेषु साम्यम्, अन्येषु च स्थलेषु स्पष्टं वैषम्यं दृश्यते। उभयभाष्यकाराः आनन्दमयशब्दस्य परब्रह्मपरत्वम् अङ्गीकुर्वन्ति, तथा च “आनन्दमयोऽभ्यासात्”, “तद्धेतुव्यपदेशाच्च”, “मान्त्रवर्णिकमेव च गीयते” इत्यादिसूत्रेषु प्रतिपादितलिङ्गानां ब्रह्मविषयतां स्वीकुर्वन्ति। तथापि तस्य ब्रह्मणः स्वरूपनिरूपणे, जीवब्रह्मसम्बन्धे, मोक्षस्वरूपे च उभयोर्मध्ये महदन्तरं दृश्यते।

शाङ्करभाष्यकाराणां मते आनन्दमयः परमार्थतः निर्गुणब्रह्मैव, यत् सर्वोपाधिविरहं, निरवच्छिन्नचैतन्यमात्रस्वरूपं च। “भेदव्यपदेशाच्च” इत्यादिषु श्रुतिषु प्रतिपादितः जीवब्रह्मभेदः अविद्याकल्पित-व्यावहारिकदशायामेव ग्राह्यः, न तु परमार्थतः। मोक्षे च जीवस्य ब्रह्मणि तादात्म्यसाक्षात्कारः एव परमपुरुषार्थः इति तेषां निष्कर्षः।

स्वामिनारायणभाष्यकाराणां मते तु आनन्दमयः सर्वगुणपरिपूर्णः, सर्वानन्दनिधानभूतः, अक्षरातीतः परब्रह्मपुरुषोत्तमः। तेषां व्याख्याने जीवः, अक्षरब्रह्म, परब्रह्म चेति तत्त्वत्रयस्य यथार्थभेदः स्वीकृतः। अतः

"भेदव्यपदेशाच्च" इति सूत्रे प्रतिपादितः भेदः केवलं व्यावहारिकः न, अपितु तात्त्विकः अपि मन्यते। अयं भेददृष्टिकोणः एव उभयदर्शनयोर्मध्यम् अत्यन्तं मूलभूतं वैषम्यं प्रकाशयति।

तथैव मोक्षस्वरूपविवेचनेऽपि भेदः सुस्पष्टः। शाङ्करभाष्यकाराणां मते अविद्यानिवृत्तिपूर्वकं ब्रह्मात्मैक्यसाक्षात्कारः मोक्षः, यत्र ज्ञाता-ज्ञेय-ज्ञानभेदः विलीयते। स्वामिनारायणभाष्यकाराणां मते तु जीवः अक्षररूपतां प्राप्य पुरुषोत्तमस्य नित्यसेवकत्वेन तिष्ठति। अतः मोक्षः तादात्म्यरूपः न, किन्तु भगवत्साक्षात्कार-भक्ति-सेवारूपः इति प्रतिपाद्यते।

व्याख्यानपद्धत्यामपि उभयत्र विशेषो दृश्यते। शाङ्करभाष्यकाराः श्रुतितात्पर्यनिर्णये अद्वैतसिद्धान्तानुकूलतया श्रुतिसमन्वयं कुर्वन्ति, यत्र सर्वश्रुतयः अन्ततः अभेदपरब्रह्मणि पर्यवसन्ति। स्वामिनारायण-भाष्यकाराः तु अक्षरपुरुषोत्तमवेदान्तस्य परिप्रेक्ष्ये श्रुतीनां व्याख्यानं कुर्वन्तः परब्रह्मणः सर्वोच्चत्वं, अक्षरब्रह्मणः पृथक्स्वरूपं, जीवस्य परतन्त्रत्वं च प्रतिपादयन्ति।

एवं च आनन्दमयाधिकरणस्य व्याख्याने उभयभाष्यकाराणां श्रुतिप्रामाण्ये, आनन्दमयस्य परमतत्त्वपरत्वे च साम्यमस्ति; किन्तु तस्य परमतत्त्वस्य स्वरूपनिर्णये, जीवब्रह्मसम्बन्धे, मोक्षस्वरूपे च गम्भीरं दार्शनिकवैषम्यं दृश्यते। एतदेव वैषम्यम् अद्वैतवेदान्तस्य अक्षरपुरुषोत्तमवेदान्तस्य च स्वातन्त्र्यं विशदतया प्रकाशयति।

**उपसंहारः**

अस्मात् तुलनात्मकाध्ययनात् वेदान्तपरम्परायां श्रुतिव्याख्यान-वैविध्यस्य, ब्रह्मस्वरूपविचारस्य, मोक्षतत्त्वनिरूपणस्य च सूक्ष्माव-बोधः जायते। समानश्रुत्याधारेऽपि भिन्नदर्शनानां कथं स्वतन्त्राः सिद्धान्ताः प्रतिष्ठाप्यन्ते इति अस्मादधिकरणात् सुस्पष्टं ज्ञायते। अतः आनन्दमयाधिकरणस्य अध्ययनं न केवलं ब्रह्मसूत्रार्थबोधाय, अपितु अद्वैतवेदान्तस्य अक्षरपुरुषोत्तमवेदान्तस्य च तात्त्विकवैशिष्ट्य-परिज्ञानायापि विशेषतया उपकरोति।

**सहायकग्रन्थसूची**


- बादरायणः, ब्रह्मसूत्रम्, चौखम्बा संस्कृत संस्थान, वाराणसी।
- शङ्करभगवत्पादाचार्यः, ब्रह्मसूत्रशाङ्करभाष्यम्, चौखम्बा संस्कृत संस्थान, वाराणसी।
- भद्रेशदासस्वामी, स्वामिनारायणभाष्यम् (ब्रह्मसूत्रभाष्यम्), स्वामिनारायण अक्षरपीठम्, अहमदाबाद।
- तैत्तिरीयोपनिषद् शाङ्करभाष्यसहितम्, गीता प्रेस, गोरखपुर।
- मुण्डकोपनिषद् शाङ्करभाष्यसहितम्, गीता प्रेस, गोरखपुर।
- बृहदारण्यकोपनिषद् शाङ्करभाष्यसहितम्, गीता प्रेस, गोरखपुर।
- छान्दोग्योपनिषद् शाङ्करभाष्यसहितम्, गीता प्रेस, गोरखपुर।
- भद्रेशदासस्वामी, स्वामिनारायणसिद्धान्तसुधा, स्वामिनारायण अक्षरपीठम्, अहमदाबाद।


**पाद टिप्पणी**

[1]ब्रह्मसूत्रम् १.१.१२

[2]ब्रह्मसूत्रम् १.१.१९

[3]तैत्तिरीयोपनिषत्, ब्रह्मानन्दवल्ली, २.५

[4]तैत्तिरीयोपनिषत्, ब्रह्मानन्दवल्ली, २.७

[5]तैत्तिरीयोपनिषत्, ब्रह्मानन्दवल्ली, २.९

[6]ब्रह्मसूत्रम् १.१.१३

[7]ब्रह्मसूत्रम् १.१.१४

[8]तैत्तिरीयोपनिषत्, ब्रह्मानन्दवल्ली २.७

[9]ब्रह्मसूत्रम् १.१.१५

[10]तैत्तिरीयोपनिषत्, ब्रह्मानन्दवल्ली २.१

[11]ब्रह्मसूत्रम् १.१.१६

[12]ब्रह्मसूत्रम् १.१.१७

[13]ब्रह्मसूत्रम् १.१.१८

[14]ब्रह्मसूत्रम् १.१.१९